**Kalika Prabha : Journal of Multidisciplinary Studies**
[ISSN:- 3021-9388 (Print)]
Published by Kalika Sanskrit Vidyapeeth (RMC) Nawalpur, Nepal
https//www.ksv.edu.np

# मलमासक्षयमासयोर्विवेचनम्

**कपिलदेवभट्टराईः**

*सहप्राध्यापकः, सिद्धान्तज्योतिषविषयस्य, ने.सं.वि., कालिकासंस्कृतविद्यापीठम्*

***Article History :*** *Received : 27th, Jan. 2026; Reviewed: 22nd, Apr. 2026; Accepted: 29th June, 2026*
***Corresponding Author*** *: Kapildev Bhattarai* ***E-mail :*** *kapildevbhattarai@gmail.com*
***DOI :*** *https://doi.org/10.3126/kp.v4i1.97021* ***ORCID****: https://orcid.org/0009-0004-7898-4975*

## लेखसारः

*अधिमासक्षयमासौ द्वावपि चान्द्रमानेनाधारितौ भवतः। अधिकमासस्याधिमासो, मलमासः,पुरुषोत्तममास इत्यादीनि नामान्यपि सन्ति प्रचलितानि। प्रतित्रिवर्षस्यान्तराले आपतितस्य अधिमासस्य, तथा च दीर्घकालान्तराले जायमानस्य क्षयमासस्य विषये ज्योतिषशास्त्रे प्रभूता चर्चा प्राप्यते। सौरसङ्क्रान्तिरहितश्चान्द्रमासोऽधिमासः कथ्यते। तथैव द्विसङ्क्रान्तियुक्तश्चान्द्रमासः क्षयमासो निगद्यते। ज्योतिषशास्त्रे कालगणनाया नवविधमानानि प्रसिद्धानि सन्ति। तेषु सौर–चान्द्र–नाक्षत्र–सावनमिति चत्वारि मानानि मानवव्यवहारेषु बहुप्रचलितानि सन्ति। दैनिकतिथिमितिगणनायां समायाता अहोरात्र-मास-ऋतवः, सूर्यस्य राशिसङ्क्रमणकारणात् समुत्पन्नाः सङ्क्रान्तयः, तासां पुण्यकालाः, सूर्यस्य गत्याधारेण निर्धार्यमाणे दक्षिणोत्तरायणभेदेन द्वेऽयने इत्याद्या गणनाः सौरमानपद्धतौ आधारिता भवन्ति। चान्द्रमानपद्धतिर्धार्मिककार्यसम्पादने प्रचलिता विद्यते। विजयादशमी–यमपञ्चक–हरितालिका–रामनवमी–शिवरात्रि–श्रीकृष्णजन्माष्टमीत्यादय उत्सवा अपि चान्द्रमाननुसारेणैव प्रवर्तन्ते। प्रतिवर्षम् आङ्ग्लमासेषु दिनाङ्कसंख्या समाना भवति। किन्तु चतुर्भिर्निःशेषभाजिते प्रत्येकस्मिन् चतुर्थे वर्षे फेब्रुअरी-मासे एकं दिनं वर्धते, येनासौ मास एकोनत्रिंशत् (२९) दिनपरिमितो भवति। तच्च वर्षं 'Leap Year' (अधिवर्षम्) इति नाम्ना ज्ञायते। गणनापद्धतौ प्रयुक्ता इयं रीतिः पाश्चात्यजगति निश्चितसमयस्याधिदिवसीयपरिकल्पनां (Leap Day) प्रस्तौति। एतद् 'लीप इयर' सौरमाने आधारितं भवति। पाश्चात्यज्योतिषपद्धतौ 'लीप इयर' इत्यस्य निर्धारणे वर्ष-मास-दिनानि यथा निश्चितानि सन्ति, तथैव पौरस्त्यज्योतिषपद्धतौ क्षयमासोऽपि कार्तिक–मार्गशीर्षे–पौषमासेष्वेव भवतीति सुनिश्चितो वर्तते। यस्मिन् वर्षे क्षयमासः आपतति, तस्मिन् वर्षे क्षयमासात् पूर्वं पश्चाच्चाधिकमासद्वयं समापतति।*

**कूटशब्दाः** – क्षयमासः, भचक्रम्, मलमासः, महायुगः, लिपइयर, सङ्क्रान्तिः, सूर्यसिद्धान्तः।

## विषयप्रवेशः

'मस परिमाणे' धातोः 'परिमीयते अनेन' इत्यर्थे 'घञ्' प्रत्यये कृते उपधावृद्ध्या निष्पन्नः 'मास' शब्दः त्रिंशद्दिनात्मकसमयावधिं बोधयति। धारणपोषणार्थकाद् 'डुधाञ्' धातोः 'आङ्' उपसर्गपूर्वकं निष्पन्नेनाव्ययवर्गस्य 'अधि' शब्देन 'आधीयते इति' व्युत्पत्त्या 'उच्चस्तरे स्थापनम्' इत्यर्थः प्रतिपाद्यते। 'मास' इति आधारपदे 'अधि' इति उपसर्गसंयोगेन निर्मितः 'अधिमास' शब्दः सामान्यत एकवर्षीयद्वादशमासेभ्योऽधिकमर्थात् त्रयोदशं मासं सूचयति।

## सामग्रीसङ्कलनमध्ययनविधिश्च

प्रस्तुतलेखस्य निर्माणसन्दर्भे विशेषतः सामग्रीसङ्कलनक्रमे ग्रन्थालयीयपद्धतिः (पुस्तकालयीया विधिः) अवलम्बिता अस्ति। तथैव सिद्धान्तज्योतिषस्य विविधेभ्यो ग्रन्थेभ्यो मुहूर्तशास्त्रेभ्यश्चाधिमास-क्षयमाससम्बद्धेषु शीर्षकेषु केन्द्रितानां, विद्वद्भिः कृतानामनुसन्धानमूलकलेखानां विभिन्नमाध्यमैः प्रकाशितानां पुस्तकानाञ्च साहाय्येनावश्यकाः सामग्र्यो गृहीताः सन्ति; तदनन्तरं तासां सामग्रीणां सैद्धान्तिकीं व्याख्यां, विश्लेषणं, तुलनां च कृत्वा निष्कर्षोऽपि निष्पादितोऽस्ति।

## समस्याः सीमा च

ज्योतिषशास्त्रे वर्णितावधिमासक्षयमासौ नेपालदेशवास्तव्यानां कृते नवीनौ विषयावेव न दृश्येते। अधिमासक्षयमासौ द्वावपि चान्द्रमानानुसारिण्यां कालगणनायां सम्भवतः, तथापि तयोरागमनं समानावधौ न वर्तते। ज्योतिषशास्त्रे सिद्धान्तोऽयं प्राप्यते यदधिमासः प्रतित्रयवर्षाभ्यन्तरे समायाति, परन्तु क्षयमासस्यागमने न्यूनतमेऽप्यैकोनविंशतिवर्षादेकचत्वारिंशदधिकशतं (१४१) वर्षाणि यावत् समयो भवितुं शक्नोति। यस्मिन् वर्षेऽधिमासो भवति तस्मिन् वर्षे क्षयमासो न सम्भवति, परन्तु यस्मिन् वर्षे क्षयमासो भवति तस्मिन् वर्षे द्वावधिमासौ भवतः। किमस्ति कारणमत्र ? यदि अधिमास-क्षयमासावुभावपि कालगणनाक्रमे उत्पन्नौ समयविकारौ स्तः, तर्हि अनयोर्मध्ये किमर्थं सैद्धान्तिकं वैषम्यं दृश्यते ? अधिमासक्षयमासयोः प्राचीनैतिह्यं कीदृशं वर्तते ? अधिमासक्षयमासविषये मानवमनसि प्रचलितानामेतादृशामनेकेषां प्रश्नानां सप्रमाणं सन्देहनिराकरणमेवास्यालेखस्य प्रमुख्या समस्या वर्तते। अत एतादृशाः समस्यासम्बद्धाः प्रश्ना अत्रोल्लेखनीयाः सन्ति –

क.अधिमास-मलमास-पुरुषोत्तममास-क्षयमासाः कीदृशा मासाः सन्ति ?

ख.क्षयमासाधिमासयोर्मध्ये सम्बन्धोऽस्ति न वा ?

ग.अधिमासक्षयमासयोः कृत्याकृत्यविचारः कथं क्रियते ?

एषामेव मुख्यप्रश्नानानामन्येषां सहायकप्रश्नानाञ्चोत्तरान्वेषणप्रयासोऽस्मिनालेखे कृतो विद्यते। वेदाङ्गानां चक्षुःस्वरूपमन्यमानं ज्योतिषशास्त्रं कालगणनाया मुख्य आधारो वर्तते। अस्यैवाधारेण विविधमानकपद्धतिषु समयचक्रं विभज्य कालगणनाय व्यवस्थितं क्रियते। चान्द्रमानपद्धत्यनुसारेण तिथिगणनायामधिमासक्षयमासौ समागच्छन्तौ भवतः। अस्माकं समाजे धार्मिकदृष्ट्याप्यवलोक्यमानयो अधिमासक्षयमासयोः विषये केन्द्रीकृत्य विषयोपस्थापनमेवालेखस्यास्य सीमा वर्तते।

## उद्देश्यम्

ज्योतिषशास्त्रे वर्णितयोरधिमास-क्षयमासयोर्विषयेऽस्माकं समाजवासिनां जनानां मनसि विद्यमानानां जिज्ञासानां निराकरणमेवास्य लेखस्य मुख्यमुद्देश्यं वर्तते। आलेखेऽस्मिन् स्थापितसमस्याबोधकप्रश्नानां समाधानात्मकमुत्तरप्राप्त्यर्थमुद्देश्यानीत्थं निर्धारितानि सन्त्यत्र –

क. सपरिचयमधिमास-क्षयमासयोः सैद्धान्तिकपक्षाणां विवेचनम्।

ख. समाजवासीनां मनस्युत्पन्नानामधिमास-क्षयमाससम्बन्धीनां जिज्ञासानां सप्रमाणं निराकरणम्।

ग. अधिमास-क्षयमाससमये कृत्याकृत्यविषये स्पष्टीकरणम्।

## अध्ययनस्यौचित्यम्

ज्योतिषशास्त्रे वर्णितयोरधिमास-क्षयमासयोर्विषये विविधेषु कालखण्डेषु विविधैर्विद्वद्भिः स्व-स्वसिद्धान्तानुसारेणाध्ययनमनुसन्धानं च विधाय नैकविधचर्चा कृता प्राप्यते। तत्राधिमासक्षयमासयोः कार्यसम्पादनविषये नैकविधानि मतानि प्रस्तुतानि सन्ति। तदन्वधिमास-क्षयमासयोः विषये पृथक्-पृथग् अध्ययनान्यपि जातानि सन्ति। तथापि धार्मिकमान्यताधारितसामाजिकपरम्परायाः मलमासक्षयमासयोस्तयोस्तिथिनिर्धारणस्य च विषये केन्द्रीभूय समष्टिगतं चिन्तनं न सञ्जातमिव दृश्यते। तस्मादेव कारणात् मलमासक्षयमासविषयेऽस्माकं समाजवासिषु सामान्यज्ञानं सत्त्वेऽप्यनयोः सैद्धान्तिकव्यावहारिकपक्षयोर्विषये सर्वेषु जनहृदिषु पूर्णज्ञानं न प्राप्यते। प्रस्तुतेऽस्मिन्नालेखेऽधिमासक्षयमासयोर्विषये युगपदेव समष्टिगतं चिन्तनं प्रस्तुतमस्ति। अतोऽध्ययनमेतदस्माकं जनसमुदायस्य कृते सर्वदैवौचित्यपूर्णं भविष्यतीति दृश्यते।

## विषयविश्लेषणम्

### ज्योतिषशास्त्रे प्रचलिताः कालगणनापद्धतयः

पौरस्त्यज्योतिषशास्त्रस्य सूर्यसिद्धान्तग्रन्थे कालगणनार्थं ब्राह्ममानं, दिव्यमानं, पित्र्यमानं, प्राजापत्यमानं, बार्हस्पत्यमानं, सौरमानं, सावनमानं, चान्द्रमानं, नाक्षत्रमानं चेति नवविधमानानि प्रचलितानि सन्ति। यथा –

ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं च गौरवम्।

सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नव ॥ (मानाध्यायः –१)

सृष्टिकर्त्रा ब्रह्मणा सह सम्बद्धे ब्राह्ममाने मनुष्याणामेकः कल्पपरिमितसमयो ब्रह्मणो दिनमेकं मन्यते। देवैः सह सम्बद्धे दिव्यमाने मानुषाणाम् वर्षमेकं देवानामेकमहोरात्रं मन्यते। चन्द्रलोकस्योर्ध्वभागे निवसद्भिः पितृभिः सह सम्बद्धे पित्र्यमाने एकपक्षस्य पञ्चदशतिथीनां वा पितॄणां दिनम्, तथा अपरपक्षस्य पञ्चदशतिथीनां पितॄणां रात्रिर्भवति। अर्थाद् एकस्मिन् चान्द्रमासे पितॄणाम् केवलमेकमहोरात्रो भवति। युगवर्षप्रमाणेषु कलियुगस्य ४३२००० सौरवर्षाणि, द्वापरयुगस्य ८६४००० सौरवर्षाणि, त्रेतायुगस्य १२९६००० सौरवर्षाणि, सत्ययुगस्य १७२८००० सौरवर्षाणि भवन्तीति निश्चितानि सन्ति ज्योतिषग्रन्थेषु। चतुर्युगाणां युगवर्षप्रमाणानि योजिते सति ४३२०००० सौरवर्षाणि भवन्ति। एतदेव एकं महायुगवर्षप्रमाणं कथ्यते। एतेषां महायुगानां एकसप्ततिवारं यावदावृत्तिर्भवति चेत्तत्र ३०६७२०००० सौरवर्षाणि व्यतितानि भवन्ति। कालोऽयमेकमन्वन्तरमित्युच्यते। मन्वन्तरे दिनरात्र्योर्भेदशून्यं भवति। एषा मन्वन्तरावधिरेव प्राजापत्यमानमित्यभिधीयते। विषयेऽस्मिन् सूर्यसिद्धान्ते कथितं विद्यते यथा–

युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते। (मध्यमाधिकारः१८)

मन्वन्तरव्यवस्था च प्राजापत्यमुदाहृतम्।

न तत्र द्युनिशोर्भेदो ब्राह्मं कल्पः प्रकीर्तितम् ॥ (मानाध्यायः२१)

बृहस्पतिना सह सम्बद्धे बार्हस्पत्यमाने बृहस्पतिर्मध्यमराशिभोगेन संवत्सरैकं पूरयति। सूर्येण सह सम्बद्धे सौरमाने सूर्यस्य स्वकक्षभ्रमणकाल एकः सौरवर्षः कथ्यते। सूर्योदयेन सह सम्बद्धे सावनमाने प्रथमदिनस्य सूर्योदयाद् द्वितीयदिनस्य सूर्योदयं यावत् कालः सावनदिनमेकं मन्यते। यज्ञकर्मणः कालनिर्धारणे, सूतकाद्याशौचनिर्णये, दिन-मास-वर्षाणामधिपतिनिर्धारणे मध्यमग्रहगतिसाधने च प्रयोगसिद्धं सावनमानं सिद्धान्तग्रन्थेषु वर्णितं विद्यते यथा सूर्यसिद्धान्ते –

उदयादुदयं भानोः सावनं तत् प्रकीर्तितम्।

सावनानि स्युरेतेन यज्ञकालविधिस्तु तैः ॥

सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा।

मध्यमा ग्रहभुक्तिस्तु सावनेनैव गृह्यते ॥ (मानाध्यायः१८–१९)

## व्यवहारप्रसिद्धानि चत्वारि मानानि

चन्द्रेण सह सम्बद्धे चान्द्रमाने एकस्याः तिथेर्भोगकाल एव दिनमेकं मन्यते। नक्षत्रेण सह सम्बद्धे नाक्षत्रमाने एकस्य नक्षत्रस्योदयाद् आरभ्याग्रिमनक्षत्रस्योदयकालं यावद्दिनमेकं मन्यते। नाक्षत्रमाने षष्टिघट्यात्मकमहोरात्रमानं मन्यते। कालगणनायां प्रचलितानां नवपद्धतीनां नामानि ज्योतिषशास्त्रस्य सिद्धान्तग्रन्थेषु प्राप्यन्ते। एतेषु नवमानेषु सौर-चान्द्र-नाक्षत्र-सावनमानसम्बद्धाः चतस्रः पद्धतयः मानवानां व्यावहारिकप्रयोजनदृशाः प्रसिद्धा दृश्यन्ते। उक्तञ्च सूर्यसिद्धान्ते –

चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः।

बार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यशः ॥ (मानाध्यायः-२)

एतद्विषयचिन्तनं भास्कराचार्येण सिद्धान्तशिरोमणौ यथा प्रस्तुतं दृश्यते –

वर्षायनर्तुयुगपूर्वकमत्र सौरान्, मासास्तथा च तिथयस्तुहिनांशुमानात्।

यत्कृच्छ्रसूतकचिकित्सितवासराद्यम्, तत्सावनाच्च घटिकादिकमार्क्षमानात् ॥ (कालमानाध्यायः –३१)

## सौरमानं चान्द्रमानञ्च

एतेषु चतुर्विधेषु मानेष्वप्यस्माकं दैनन्दिनतिथिमितिगणनायां सौरमानं तथा धार्मिककार्येषु चान्द्रमानस्याधिकं प्रचलनं प्राप्यते। कालक्रमेण समायाता दिनरात्री मासाः, ऋतवः, सूर्यस्य राशिसङ्क्रमणादुत्पन्नाः सङ्क्रान्तयस्तासां पुण्यकालाः, तथा सूर्यस्य याम्यसौम्यायने द्वे गती निर्धारणेऽपि सौरमानं प्रयुज्यत इति सूर्यसिद्धान्ते लिखितमस्ति।

सौरेण द्युनिशोर्मानं षडशीतिमुखानि च।

अयनं विषुवच्चैवं सङ्क्रान्तेः पुण्यकालता ॥ (मानाध्यायः३)

अमावस्यायां समधरातलस्य शून्यराश्यन्तरे स्थितयोः सूर्यचन्द्रयोर्गत्यन्तरात् प्रतिद्वादशांशान्तरे उत्पन्नानां तिथीनां करणानाञ्च गणनासु, विवाह-व्रतबन्धादिसंस्काराणां, व्रतोपवास-यात्रापर्वोत्सवानाञ्च गणनायां चान्द्रमानमङ्गीक्रियते। यथा सूर्यसिद्धान्ते –

अर्काद् विनिस्सृतः प्राचीं यद्यात्यहरहः शशी।
तच्चान्द्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिः॥
तिथिः करणमुद्वाहः क्षौरं सर्वक्रियास्तथा।
व्रतोपवासयात्राणां क्रिया चान्द्रेण गृह्यते॥ (मानाध्यायः–१२–१३)

## नाक्षत्रमानाधारेण चान्द्रमासानां नामकरणम्

भचक्रस्य नक्षत्रमण्डलस्य वा एकवारं भ्रमणकालो यावत् समयो नाक्षत्रदिनमेकं मन्यते। अश्विन्यादि-सप्तविंशतिनक्षत्राणां मध्ये पूर्णिमातिथेः पर्वान्तविन्दौ येन चन्द्रस्य येन नक्षत्रेण सह संयोगो भवति, तस्यैव नक्षत्रस्य नाम्ना मासस्यास्य नामकरणं क्रियते। अतश्चान्द्रमासानां नामकरणे नाक्षत्रमानस्य महानुपयोगो विद्यते। यथा कृत्तिका-रोहिणीनक्षत्रयोः पूर्णिमायां कार्तिकमासः, मृगशिरा-आर्द्रानक्षत्रयोः पूर्णिमायां मार्गशीर्षमासः, पुनर्वसु-पुष्यनक्षत्रयोः पूर्णिमायां पौषमासः, अश्लेषा-मघानक्षत्रयोः पूर्णिमायां माघमासः, पूर्वाफाल्गुनी-उत्तराफाल्गुनी-हस्तनक्षत्रेषु पूर्णिमायां फाल्गुनमासः, चित्रा-स्वातीनक्षत्रयोः पूर्णिमायां चैत्रमासः, विशाखा-अनुराधानक्षत्रयोः पूर्णिमायां वैशाखमासः, ज्येष्ठा-मूलनक्षत्रयोः पूर्णिमायां ज्येष्ठमासः, पूर्वाषाढा-उत्तराषाढानक्षत्रयोः पूर्णिमायां आषाढमासः, श्रवण-धनिष्ठानक्षत्रयोः पूर्णिमायां श्रावणमासः, शतभिषा-पूर्वभाद्रपदा-उत्तरभाद्रपदानक्षत्रेसु पूर्णिमायां भाद्रपदमासः, तथा च रेवती-अश्विनी-भरणीनक्षत्रेसु पूर्णिमायां सत्यां आश्विनमासः सम्भवति।

**"अमावास्यया मासान्सम्पाद्याहरुत्सृजन्ति अमावास्यया हि मासान् सम्पश्यन्ति पौर्णमास्या मासान्सम्पाद्याहरुत्सृजन्ति पौर्णमास्या हि मासान्सम्पश्यन्ति॥** (तैत्तिरीयसंहिता ७/५/६/१)

सौरमानपद्धतौ तिथिकल्पनायां सर्वदैकरूपता भवति, परन्तु चान्द्रमानपद्धतौ तिथिकल्पनायां सर्वदैकरूपता न सम्भवति। अतः साधारणजनानां कृते चान्द्रमानपद्धतेरपेक्षया सौरमानपद्धतेरेवातीव सरला सुगमा च मन्यते। किन्त्वस्माकं समाजे चान्द्रमानाधारेण सम्पाद्यमानानामेकादश्यमावास्या-पूर्णिमादितिथीनां धार्मिकमहत्त्वं सर्वत्र दृश्यते। अमावास्यायां पूर्णिमायां च भूकर्षणनिषेधः, अमावस्यायामेकादश्याञ्च मांसभक्षणवर्जनमेतादृश्यः सामाजिकपरम्पराः अद्याप्यस्माकं समाजे प्रचलिता दृश्यते (भट्टराईः, २०६४: ६)। चान्द्रमानपद्धतौ समाश्रितश्चान्द्रमासोऽपि तिथ्याधारेण 'अमान्तः' 'पूर्णिमान्तः' भेदेन द्विधास्ति। चान्द्रमानानुसारेणैकस्या अमावस्याया आरभ्याग्रिमाममावास्यां यावत् कालोऽमान्तचान्द्रमासः कथ्यते। एकां पूर्णिमामारभ्याग्रिमपूर्णिमां यावत् कालः 'पूर्णिमान्तचान्द्रमासः' इत्यभिधीयते। वैदिककाले अमान्त-पूर्णिमान्तौ द्विविधावपि चान्द्रमासौ प्रचलितावास्ताम्। यस्यां तिथौ चान्द्रमासो पूर्णो भवति सा 'पौर्णमासीति' कथ्यते। 'पूर्णमासी' पूर्णिमातिथेः पर्यायपदमस्ति। अस्य दृढप्रमाणं तैत्तिरीयसंहितायामुपलभ्यते– **'बर्हिषा पूर्णमासे व्रतमुपैति वत्सैरमावास्यायाम्'** (तैत्तिरीयसंहिता, १/६/७)। तैत्तिरीयसंहिताया वचनेऽस्मिन्

'पूर्णमासे' 'अमावास्यायाम्' इति द्वावेव शब्दौ युगपदेवागतौ दृश्येते। अतस्तात्कालिकसमयेऽमान्त-पूर्णिमान्तौ द्विविधावपि मासौ कालगणनायां प्रचलितौ आस्तामिति सिद्ध्यति।

वर्तमानसमये नर्मदानद्यारुत्तरभागे पूर्णिमान्तचान्द्रमासस्य, दक्षिणभागेऽमान्तचान्द्रमासस्य प्रचलनं प्राप्यते। माधवाचार्यस्य ताम्रपत्रे उल्लिखिते 'शके १३१३ वैशाखमासे कृष्णपक्षेऽमावास्यायां सौम्यदिने सूर्योपरागपुण्यकाले' इति वचने पूर्णिमान्तमानस्य वैशाखमासस्यामावस्यां तिथौ बुधवासरे प्रवृत्तस्य सूर्यग्रहणस्योल्लेखो वर्तते। एतेन स्पष्टं भवति यत् शकसंवतः चतुर्दशशताब्द्यां पूर्णिमान्तचान्द्रमासस्योपयोग आसीत्। नर्मदायारुत्तरभारतेऽद्यापि पूर्णिमान्तचान्द्रमासस्यैव प्रचलनं वर्तते किन्तु मासानां नामकरणं मलमासक्षयमासयोर्गणना चामान्तमानाधारेणैव निश्चीयते (भट्टराई, २०६४: ६)।

## अधिमासःकथं गणनीयः ?

अस्माकं समाजे 'मलमास' नाम्नापि प्रसिद्धस्याधिमासस्य विषये सामान्यजना अपि परिचिताः सन्ति। किन्त्वधिमासः को वर्तते ? अधिमासः कथं सम्भवति ? विषयेऽस्मिन् बहुष्वनभिज्ञता दृश्यते। प्रतिमासे समागताः सङ्क्रान्तयः सौरमानाधारिता भवन्ति। किन्त्वअधिमास-क्षयमासयोर्गणना चान्द्रमानाधारेणैव क्रियते। सूर्यचन्द्रयोर्मध्यमा गतिः समाना न भवति कदापि। सूर्यमध्यमगत्यनुसारेणैकस्मिन् सौरमासे त्रिंशद् दिनानि, षड्विंशतिः घट्यः, अष्टादश पलानि भवन्ति। चन्द्रमध्यमगत्यनुसारेण चान्द्रमासे एकोनत्रिंशद् दिनानि, एकत्रिंशद् घट्यः, पञ्चाशत् पलानि च भवन्ति। मध्यममानेन सौर-चान्द्रमासयोः चतुःपञ्चाशद् घट्यः, अष्टाविंशतिः पलान्यन्तरं जायते। तथैव एकस्मिन् सौरवर्षे दश दिनानि, त्रिपञ्चाशद् घट्यः, षट्त्रिंशत् पलानि यावता कालेन सौरवर्षात् चान्द्रवर्षम् अधिकं भवति। अस्मादेव सिद्धान्तात् सौरमानानुसारेण द्वात्रिंशन्मासव्यतीतेषु, चान्द्रमानानुसारं एकोनत्रिंशद् (२९) दिनानि, द्वे (२) घट्यौ, षट्पञ्चाशत् (५६) पलानि चाधिकानि भवन्ति। वेदाङ्गज्योतिषे चन्द्रगतेः सूक्ष्मत्वं स्वीकृत्य सौरमानस्य त्रिंशत्मासव्यतितेषु चान्द्रमाने एको मासोऽधिकायते। इत्थं समागतोऽधिकमासो हि मलमासो मन्यते। ब्रह्मसिद्धान्ते सौरमानस्य द्वात्रिंशन्मासेष्वधिमासः समागच्छतीति कथितमस्ति। वेदाङ्गज्योतिषे ब्रह्मसिद्धान्ते च ग्रन्थकारैः मतवैविध्यं प्रस्तावितमस्ति। पञ्चसिद्धान्तिका-सूर्यसिद्धान्तादि-सिद्धान्तग्रन्थानां निर्माणपश्चात् पञ्चाङ्गगणनायां यदा सूक्ष्मगणितप्रक्रिया आरब्धा, तदाधिमाससम्बद्धस्थापितसिद्धान्तोऽपि परिवर्तितः। तदा द्वात्रिंशत् सौरमासात् त्रयस्त्रिंशत् सौरमासाभ्यन्तरेऽधिमासस्वीकरणस्य पद्धतिः स्थापितेति भारतीयज्योतिषशास्त्रस्येतिहासे शङ्करबालकृष्णदीक्षितेन उल्लिखितमस्ति (दीक्षितः, २००२ : ५११)।

## अधिमासक्षयमासयोः परिभाषा स्वरूपं च

अमावासीतोऽपरामावासीं यावदेकश्चान्द्रमासः कालो ज्ञायते। एकस्मिन् चान्द्रमासावधौ सूर्यस्य राशिसङ्क्रमणमेकवारमपि न भवति चेदसौ चान्द्रमासः सूर्यसङ्क्रान्तिविहीनश्चान्द्रमासो भवति। सूर्यसङ्क्रान्तिहीनश्चान्द्रमासोऽधिकमासो मलमासो वा कथ्यते। तथैव एकस्मिन् चान्द्रमासे द्विवारं यावत् सूर्यस्य राशिसङ्क्रमणं भवति चेदसौ मासः 'क्षयमासः' नाम्ना व्यवहृयते। सूर्यचन्द्रयोर्गत्यन्तराद् द्वात्रिंशत्सौरमासाभ्यन्तरे

एकश्चान्द्रमाससमानाः तिथिसङ्ख्या वर्धन्ते। तिथिसङ्ख्यावर्धनेन मासस्य विकारस्वरूपेणागतोऽयमधिमासो 'मलमासः' नाम्नापि अभिधीयते।

चान्द्रो मासो ह्यसङ्क्रान्त्यो मलमासः प्रकीर्तितः। ( बृहद्दैवज्ञरञ्जनम्–१९/८)

अधिमासस्य परिचर्चा ज्योतिषशास्त्रसम्बद्धेषु नैकविधेषु ग्रन्थेषु कृता दृश्यते। सूर्यसिद्धान्तेऽधिमासं यथा परिभाषितमस्ति –

भवन्ति शशिनो मासाः सूर्येन्दुभगणान्तरम्।

रवि मासोनितास्तेषु शेषाः स्युरधिमासकाः॥ (मध्यमाधिकारः – ३५)

सिद्धान्तशिरोमणौ भास्कराचार्येणाधिमासस्य परिचर्चेत्थं प्रस्तुता –

असङ्क्रान्तिमासोऽधिमासः स्फुटः स्याद् , द्विसङ्क्रान्तिमासः क्षयाख्यः कदाचित्।

क्षयः कार्तिकादित्रये नान्यतः स्यात्, तदा वर्षमध्येऽधिमासद्वयं स्यात्॥ (अधिकमासादिनिर्णयाध्यायः – ६)

सूर्यसङ्क्रान्तिरहितश्चान्द्रमासोऽधिमासः, द्विसङ्क्रान्तियुतश्चान्द्रमासः 'क्षयमासः' इत्यधिकमासक्षयमासयोः परिभाषा। भास्करीयपरिभाषायां कार्तिकादिषु त्रिषु मासेष्वेव क्षयमासः सम्भवतीत्युल्लिखितं दृश्यते। तथैव यस्मिन् वर्षे क्षयमासो भवति, तस्मिन् वर्षे क्षयमासात् त्रिमासपूर्वमेकोऽधिमासः, त्रिमासोत्तरमेकोऽधिमासो जायते। इत्थमेकस्मिन्नेव वर्षेऽधिमासद्वयञ्च संभवति। मुहूर्तचिन्तामणौ रामदैवज्ञेनाप्यधिमासक्षयमासयोः परिभाषेत्थमुल्लिखिता दृश्यते –

स्पष्टार्कसङ्क्रान्तिविहीनचान्द्रो मासोऽधिमासः क्षयमासकस्तु।

द्विसङ्क्रमस्तत्र विभागयोस्तस्तिथेर्हि मासौ प्रथमान्त्यसञ्ज्ञौ॥ (सङ्क्रान्तिप्रकरणम्– २०)

सूर्यबिम्ब-चन्द्रबिम्बयोर्वियोगादारभ्य संयोगान्तं यावत् कालश्चान्द्रमासो भवतीति नारायणदैवज्ञस्य कथनं प्राप्यते मुहूर्तमार्तण्डे । सौरसङ्क्रान्तिरहितश्चान्द्रमासोऽधिकमासः, सौरसङ्क्रान्तिद्वययुतश्चान्द्रमासः 'क्षयमासः' इति मुहूर्तमार्तण्डोक्तमधिमासक्षयमासयोर्लक्षणम्। मलमासक्षयमासौ द्वावेवाशुद्धौ मन्येते। अधिमासक्षयमासयोरशुद्धसमये केवलं द्वितीयविकल्परहितानामत्यावश्यकीयकार्याणां सम्पादनं क्रियते। गर्भमासगणना, मासिकश्राद्धः, चान्द्रमानानुसारेण वेतनप्रदानस्थानेषु कर्मकराणां वेतनवितरणादिकार्येषु मासमेकं संवर्ध्य प्रदातव्यमित्युक्तिः प्राप्यते मुहूर्तमार्तण्डे यथा–

ब्रह्माद्यैरिनमण्डलान्त उदितश्चान्द्रस्त्वमान्तः परै–

र्मासोऽसङ्क्रमणो द्विसङ्क्रमणको ज्ञेयोऽधिकोऽथो क्षयः।

कर्माण्यन्यगतीनि नात्र तनुयाद्यज्जन्ममृत्यू क्षये

तन्मासौ तिथिखण्डयोश्चयमुखे भृत्येऽधिको गण्यते॥ (सङ्क्रान्तिप्रकरणम्– २)

## अधिमास-विवरण-तालिका

| वैक्रमाब्दे | मासः | वैक्रमाब्दे | मासः | वैक्रमाब्दे | मासः | वैक्रमाब्दे | मासः | वैक्रमाब्दे | मासः |
|---|---|---|---|---|---|---|---|---|---|
| १९५५ | आश्विनः | २०२० | आश्विनः | २०८० | श्रावणः | २१४२ | कार्तिकः | २२४५ | फाल्गुनः |
| १९५८ | आषाढः | २०२० | चैत्रः | २०८३ | जेष्ठः | २१४२ | फाल्गुनः | २२८३ | कार्तिकः |
| १९६१ | जेष्ठः | २०२३ | श्रावणः | २०८५ | कार्तिकः | २१४५ | श्रावणः | २२८३ | फाल्गुनः |
| १९६४ | चैत्रः | २०२६ | आषाढः | २०८५ | चैत्रः | २१४८ | आषाढः | २३०२ | आश्विनः |
| १९६६ | श्रावणः | २०२९ | वैशाखः | २०८८ | भाद्रः | २१५१ | वैशाखः | २३०२ | फाल्गुनः |
| १९६९ | आषाढः | २०३१ | भाद्रः | २०९१ | आषाढः | २१५३ | भाद्रः | २३६७ | आश्विनः |
| १९७३ | वैशाखः | २०३४ | आषाढः | २०९४ | जेष्ठः | २१५६ | आषाढः | २३६७ | चैत्रः |
| १९७४ | भाद्रः | २०३७ | जेष्ठः | २०९६ | आश्विनः | २१५९ | जेष्ठः | २४२३ | कार्तिकः |
| १९७७ | श्रावणः | २०३९ | आश्विनः | २०९९ | भाद्रः | २१६१ | आश्विनः | २५०८ | आश्विनः |
| १९८० | जेष्ठः | २०३९ | फाल्गुनः | २१०२ | जेष्ठः | २१६१ | चैत्रः | २५०८ | चैत्रः |
| १९८३ | चैत्रः | २०४२ | श्रावणः | २१०४ | फाल्गुनः | २१६४ | श्रावणः | २६४९ | आश्विनः |
| १९८५ | श्रावणः | २०४५ | जेष्ठः | २१०७ | श्रावणः | २१६७ | आषाढः | २६४९ | चैत्रः |
| १९८८ | आषाढः | २०४८ | वैशाखः | २११० | आषाढः | २१७० | वैशाखः | २६६८ | आश्विनः |
| १९९१ | वैशाखः | २०५० | भाद्रः | २११३ | वैशाखः | २१७२ | भाद्रः | २६६८ | फाल्गुनः |
| १९९३ | भाद्रः | २०५३ | आषाढः | २११५ | भाद्रः | २१७५ | आषाढः | २७९० | आश्विनः |
| १९९६ | श्रावणः | २०५६ | जेष्ठः | २११८ | आषाढः | २१७८ | वैशाखः | २७९० | चैत्रः |
| १९९९ | जेष्ठः | २०५८ | आश्विनः | २१२१ | जेष्ठः | २१८० | भाद्रः | २८०९ | आश्विनः |
| २००२ | चैत्रः | २०६१ | श्रावणः | २१२३ | फाल्गुनः | २१८० | फाल्गुनः | २८०९ | फाल्गुनः |
| २००४ | श्रावणः | २०६४ | जेष्ठः | २१२६ | श्रावणः | २१८३ | श्रावणः | २९३१ | आश्विनः |
| २००७ | आषाढः | २०६७ | वैशाखः | २१२९ | आषाढः | २१८६ | जेष्ठः | २९३१ | चैत्रः |
| २०१० | वैशाखः | २०६९ | भाद्रः | २१३२ | वैशाखः | २१८९ | वैशाखः | २९५० | आश्विनः |
| २०१२ | भाद्रः | २०७२ | आषाढः | २१३४ | भाद्रः | २२२६ | कार्तिकः | २९५० | फाल्गुनः |
| २०१५ | श्रावणः | २०७५ | जेष्ठः | २१३७ | आषाढः | २२२६ | चैत्रः | २९९६ | कार्तिकः |
| २०१८ | जेष्ठः | २०७७ | आश्विनः | २१४० | जेष्ठः | २२४५ | कार्तिकः | २९९६ | चैत्रः |

(चतुर्वेदीः सन् २०१५, १७७)

## क्षयमासस्य परिभाषा फलानि च

संस्कृतसाहित्ये श्रुतिपरम्परायां निर्धारिते महाकविना कालिदासेन विरचिते 'ज्योतिर्विदाभरण' नामकफलितग्रन्थेऽपि क्षयमासस्य लक्षणं प्राप्यते। क्षयमासस्यागमनमेकोनविंशति(१९)-वर्षेषु वा एकचत्वारिंशदधिकैकशत(१४१)-वर्षाणामन्तराले भवतीति प्रतिपादितमस्ति यथा – सौराद्यदा चान्द्रमसो गरीयान् मासो हि सङ्क्रान्तिरसौ क्षयाख्यः।

स यस्तदा स्यात्क्षितिवेदरूपैरब्दैर्मितैर्वा क्वचिदेकचन्द्रैः ॥ (ज्योतिर्विदाभरणः प.प्र–५१)

अधिमासक्षयमासयोर्विषये 'सिद्धान्ततत्त्वविवेके' ग्रन्थकर्त्रा कमलाकरभट्टेन एतौ द्वावेव मासौ चान्द्रमासरूपेणैव परिभाष्य सुदीर्घकालान्तरन्तरालादापतितस्य क्षयमासस्य वर्षे क्षयमासात् पूर्वं पश्चाच्च मिलित्वा द्वावधिमासौ भवतः। यथा–

असङ्क्रान्ति मासो हि चान्द्रोऽधिमासो, द्विसङ्क्रान्तिमासः क्षयाख्यस्तदानीम्।

क्षयाख्यः कदाचित्ततः प्राक् च पश्चादवश्यं हि तत्राधिमासद्वयञ्च ॥ ( मध्यमाधिकारः– ५२)

'चान्द्रो मासो ह्यसङ्क्रान्त्यो मलमासः प्रकीर्तितः' इति वचनेनाधिमासस्य परिभाषां निर्दिश्य, यद्येकस्मिन् पक्षे द्वे तिथी विनश्यतस्तर्हि व्याधिसङ्क्रमणं, शत्रुताविवर्धनम्, महामार्युल्कापातादिजन्यत्रासप्रकोपाणां प्रबलता भवति। यद्येकं पक्षमेव विनश्यति तर्हि राज्यप्रमुखायानिष्टं भवति, तथैव यदि पूर्णैकमासं विनश्यति तदा समग्रपृथिव्यामेव क्षयीकरणं जायते। तदा जलाप्लाव-भूस्खलन-भूकम्पादिप्राकृतिकप्रकोपानां भयं भवतीति 'बृहद्दैवज्ञरञ्जन'ग्रन्थे प्रतिपादितमस्ति। यस्मिन् वर्षे क्षयमासो भवति, तस्मिन् लोकवासिषु कलह-युद्ध-बुभुक्षा-दुर्भिक्ष-पीडा-प्राकृतिकविपत्तयः संभवन्ति। अतः क्षयमासोऽशुभकालत्वेन निरूपितो दृश्यते यथा –

क्षयमासो भवेद्यस्मिन् तस्मिन् वर्षेऽति विग्रहम्।

दुर्भिक्षं वाऽथवा पीडा छत्रभङ्गं करोति वा ॥

पक्षस्य मध्ये द्वितिथी विनष्टे, महाहवौ रौरव–विग्रहञ्च।

पक्षे विनष्टे नृपतिर्विनष्टः, मासक्षयश्चेत्क्षयति वसुन्धरा ॥ (बृहद्दैवज्ञरञ्जनः)

मुहूर्तकल्पद्रुमस्य ग्रन्थकारेण विठ्ठलदीक्षितेनाधिमास-क्षयमासयोः निरूपणक्रमेऽसङ्क्रान्तिमासोऽधिमासस्तथा द्विसङ्क्रान्तिमासः 'क्षयमासः'भवतीति परिभाषितम्। विदुषानेन सार्धद्वात्रिंशन्मासाणामन्तरालेऽधिमास आयाति, परन्तु क्षयमासस्यागमने सुदीर्घः कालोऽपेक्ष्यत इत्युक्त्वा कार्तिक-मार्गशीर्ष-पौषमासेष्वेव क्षयमासो भवितुं शक्नोतीत्यपि प्रतिपादितमस्ति। इत्थमनेन भास्कराचार्यस्यैव मार्गमनुसृत्य स्वकीयोऽभिमतः स्थापितो दृश्यते। यथा मुहूर्तकल्पद्रुमे-

द्विसङ्क्रमः स्यात्क्षयमाससंज्ञोऽप्यसङ्क्रमश्चेदधिकत्वमेति।

सार्धैरदैर्माभिरयं क्षयश्च कदाचिदूर्जत्रितयेऽभ्युदेति ॥ (सङ्क्रान्तिकुसुमम्–१)

## अधिमासस्य प्राचीनता पाश्चात्त्यमान्यता च

अधिकग्रन्थेषु वर्णितयोरधिमासक्षयमासयोः प्राचीनतायाः सम्बन्धे विविधाः दृष्टान्ताः प्राप्यन्ते। अद्यतनकालात् चतुर्दशशत (१४००)- वर्षेभ्यः पूर्वं गुजरातराज्ये मध्यममानेनानितस्याधिकमासस्य 'ज्योतिषदर्पण'ग्रन्थस्योदाहरणं 'भारतीयज्योतिषम्' इति ग्रन्थे उल्लिखितमस्ति। १०७२-शकाब्दे भास्कराचार्येण विरचिते सिद्धान्तशिरोमणौ क्षयमासाधिमासयोर्विषये विस्तृतचर्चा कृता विद्यते। अनेनैव प्रमाणेन पौरस्त्यज्यौतिषपरम्परायामधिमासक्षयमासयोः प्राचीनता सिद्ध्यति। पाश्चात्यज्योतिषजगति 'रोबोर्ट सेवेल' महोदयादिभिर्विद्वद्भि आङ्ग्लभाषायां लिखिते 'इण्डियन क्यालेन्डर' (Indian Calendar) नाम्नि पुस्तके ३००-ख्रीष्टाब्दतः ११००-ख्रीष्टाब्दं यावत् मध्यमानीयाधिमासस्य, तथा च ईस्वीय १९००-खीष्टाब्दं यावत् स्पष्टाधिमासस्योल्लेखः कृतोऽस्ति। एतेन पाश्चात्यज्योतिषेऽपि मलमासगणनापद्धतेर्विकासः पूर्वकालादेवासीदिति ज्ञायते किन्तु प्रस्तुतस्य पुस्तकस्य प्रकाशनं १८९६-ख्रीष्टाब्दस्य

जूनमासे एवाभवत्। अतः मलमासगणनापद्धतेः व्यावहारिकप्रचलनं तु पश्चादेवारब्धमित्यनुमानं कर्तुं शक्यते। यथा पाश्चात्यकालगणनायां ख्रीष्टाब्दस्य मासानां दिनाङ्काः समानाः एव भवन्ति, परन्तु चतुर्भिर्निःशेषभाजितेषु प्रत्येकचतुर्षु वर्षेषु फरबरीमासे दिनमेकं संयोज्यैकोनत्रिंशत् दिनानि कृत्वा 'लीप इयर' (Leap Year) इति नामकरणं क्रियते। एतेन पाश्चात्यज्योतिषजगत्यपि निश्चितसमयस्य 'अधिकदिवसपरिकल्पना' विद्यत इति सुस्पष्टं दृश्यते (भट्टराई, २०६४: ६)।

## अधिमास-क्षयमासयोर्मासनिर्धारणम्

पाश्चात्यज्योतिषपद्धतौ 'लीप इयर' इत्यस्य वर्ष-मास-दिनानां निश्चितता यथा वर्तते, तथैव पौरस्त्यज्योतिषशास्त्रेऽपि क्षयमासः कार्तिकादित्रिषु मासेष्वेव सम्भवतीति स्पष्टता दृश्यते। परन्तु अधिमासस्य सम्बन्धे 'सर्वेषु मासेष्वधिमासकः स्यात्' इति वचनात् मासस्य निश्चितता न दृश्यते। तथापि ब्रह्मसिद्धान्ते फाल्गुनादरभ्यामासेषु मलमास आपतति, कार्तिकादिषु त्रिषु मासेषु क्षयमासो भवति किन्तु माघमासेऽधिकमासक्षयमासौ द्वावपि न सम्भवति। तथ्यस्यास्य प्रमाणं ज्योतिर्निबन्धे, मुहूर्तमार्तण्डस्य मार्तण्डवल्लभटीकायाञ्च प्राप्यते यथा –

अष्टाधिमासाः स्युर्नित्यं प्रोच्यते फाल्गुनादयः।
सौम्यपौषो क्षयो नित्यं भवेतामिति निश्चितम्॥
क्षयो वाप्यधिमासो वा स्यादूर्जमिति निश्चितम्।
न क्षयो नाधिमासः स्यान्माघो वै परिकीर्तितः॥ (सङ्क्रान्तिप्रकरण–२, मार्तण्डवल्लभटीका)

'सूर्यमण्डलपरिधेरन्तः स्थितश्चन्द्रो यदा बहिरागच्छति, तस्मिन् समये यदि सूर्यस्य राशिसङ्क्रमणं भवति चेद् अधिमासो जायते' इत्युक्त्वा श्रीपतिनाधिमासं परिभाष्याधिमाससमये मुहूर्ताधारितयागादिधार्मिककार्याणि निषिद्धानि सन्तीति कथितमस्ति।

सवितृमण्डलमेति यदा शशी तदनु सङ्क्रमणं कुरुते रविः।
मखमहोत्सवनाशकरस्तदा मुनिवरैःकथितोऽधिकमासकः॥ ( ज्योतिषरत्नमाला ९/१५)

लल्लाचार्येण माङ्गलिककार्याणां विनाशकत्वेनाधिमासं परिभाष्य तस्मिन् समये मुहूर्ताधारितयागादिधार्मिककार्याणि निषिध्दानि सन्तीति 'रत्नकोश' ग्रन्थस्य प्रमाणं ज्योतिर्निबन्धे प्रस्तुतमस्ति –

यदा शशी याति गभस्तिमण्डलं दिवाकरः सङ्क्रमणं करोत्यनु।
विवाहयज्ञोत्सवनाशहेतुकस्तदाधिमासः कथितः स्वयम्भुवा॥ (ज्योतिर्निबन्धः१४, पृ.८३)

## अधिमासक्षयमासयोः कृत्याकृत्यविचारः

ज्योतिषशास्त्रधर्मशास्त्रयोर्मध्ये अन्योन्याश्रितः सम्बन्धो वर्तते। ज्योतिषशास्त्रेण निर्धारितेषु तिथि-मुहूर्तेषु कानि कार्याणि कदा करणीयानीति धर्मशास्त्रमेवादिशति। अधिमासक्षयमाससमये सम्पादनयोग्यायोग्यानां च कार्याणां सम्बन्धे शास्त्रकारैः निश्चितनियमाः स्थापिताः सन्ति। मासानां विकारस्वरूपेणोत्पादिते मलमासे विशेषमुहूर्तेषु तिथिषु च क्रियमाणानि माङ्गलिककार्याणि सम्पदानाय वर्जितानि सन्ति। वार्षिकं तिथिश्राद्धं, सप्ताह-नवाह-महारुद्रि-शतचण्डी-

चूडा-उपनयन-विवाहादिविशेषमाङ्गलिकक्रियाः मलमासक्षयमासावधौ न सम्पादनीयाः। किन्तु नियमितरूपेण क्रियमाणानि नित्यपूजा-नित्यश्राद्ध-नित्यहवनादीनि कर्माणि तु नियमानुसारेणैव सम्पादनियान्यस्यामवधावपि। विवाहोत्तरं प्रथमेऽधिमासे नववधूः पतिगृहे पतिना सह निवसति चेद् भर्तारमनिष्टं भवति। क्षयमासे पतिना सह निवसति चेद् आत्मानमनिष्टं भवतीति मुहूर्तचिन्तामणि-मुहूर्तकल्पद्रुम-ज्योतिर्निबन्ध-विवाहवृन्दावन-मुहूर्तदीपक-मुहूर्तमाला-मुहूर्तगणपति-मुहूर्तचूडामण्यादिषु मुहूर्तशास्त्रेषु प्रतिपादितमस्ति (भट्टराईः, २०६४: ५)। मुहूर्तचिन्तामणेः रचयिता रामदैवज्ञः विवाहोत्तरं प्रथमे ज्येष्ठमासे नववधूः पतिगृहे निवसति चेत् पत्युर्ज्येष्ठाग्रजं, अधिमासे भर्तारम्, आषाढमासे श्वश्रूं , पौषमासे श्वशुरं, क्षयमासे स्वशरीरमनिष्टं भवति। तथैव विवाहोत्तरं नववधूः प्रथमे चैत्रमासे पितुः गृहे पित्रा सह वसति चेत् पित्रानिष्टं भवति। अतो विवाहोत्तरं कथितेषु प्रथमादिमासेषु नववध्वा वासचिन्तनं करणीयमिति मुहूर्तशास्त्राणां निर्देशोऽस्ति। यथा मुहूर्तचिन्तामणौ –

ज्येष्ठे पतिज्येष्ठमथाधिके पतिं हन्त्यादिमे भर्तृगृहे वधूःशुचौ।
श्वश्रूं सहस्ये श्वसूरं क्षये तनुं तातं मधौ तातगृहे विवाहतः ॥ (द्विरागमनप्रकरणम्– ३)

## अधिमास-क्षयमासयोः कृत्याकृत्यविषये मुहूर्तशास्त्रस्य प्रमाणम्

ज्येष्ठमास-आषाढमास-पौषमास-अधिमासेषु नववधूः पितृगृहे, चैत्रमासे पतिगृहे निवसेदिति रानमदैवज्ञस्य कथनं प्राप्यते मुहूर्तचिन्तामणौ। कथितेषु मासेषु ज्येष्ठभ्राता-श्वश्रू-श्वशुर-पित्रादयो नववध्वा सह यदि एकस्मिन्नैव गृहे न निवसन्ति, तर्हि गृहत्यागस्यावश्यकता न भवतीति तथ्यप्रमाणं मुहूर्तमार्तण्डे ज्योतिर्निबन्धे च प्राप्यते यथा –

'उद्वाहात्प्रथमे शुचौ यदि वसेद्भर्तुगृहे कन्यका
हन्यात्तज्जननीं क्षये निजतनुं ज्येष्ठे पतिज्येष्ठकम्।
पौषे च श्वशुरं पतिं च मलिने चैत्रे स्वपित्रालये
तिष्ठन्ती पितरं निहन्ति न भयं तेषामभावे भवेत् ॥' (विवाहप्रकरणम् – ४१)

जनानां जननमरणं कस्मिन्नपि समये भवितुं शक्नोतीति सांसारिकी प्रकृतिः। अधिमासे क्षयमासेऽपि च जनानां जन्ममृत्यू भवतः। यथा जनाः प्रतिवर्षं जन्मदिने जन्मतिथौ वा जन्मोत्सवकर्म कुर्वन्ति, तथैव निधनदिवसे निधनतिथौ वा दिवङ्गतं संस्मृत्य श्राद्धादिस्मृतिकर्म कुर्वन्ति। जनने निधने वा तथाविधं कार्यसम्पादनमस्माकं सामाजिकी परम्परा वर्तते। पाश्चात्यसमाजे खीष्टमासस्य तारिखदिनाङ्काधारेण जन्मदिवसं स्मृतिदिवसञ्च आमननन्ति जनाः किन्तु पौरस्त्यसमाजे चान्द्रमानस्य तिथ्यनुसारेण जन्मदिवसं स्मृतिदिवसञ्च आमनन्ति। प्रतिवर्षमष्टाविंशति (२८) दिनाङ्केषु सीमितः फरबरीमासः 'लीप इयर' (Leap Year) वर्षे एकोनत्रिंशत् (२९) दिनाङ्कस्य भवति। दिनाङ्कानुसारेण जन्मोत्सवस्य स्मृतिदिवसस्य वा आचरणसमये, 'लीप इयर' दिने जातानां दिवङ्गतानां वा जनानां जन्मदिवसस्मृतिदिवससम्बद्धः कार्यक्रमः कदा कर्तव्यः ? पाश्चात्यज्योतिषपद्धतिः प्रश्नस्यास्य समाधानं कर्तुं न शक्नोतीति दृश्यते (भट्टराई, २०६४: ५)।

पौरस्त्यपरम्परायाः क्षयमासाधिमासौ अपि प्रतिवर्षं न आयातः। अस्मिन् काले जातानां दिवङ्गतानां वा जनानां जन्मोत्सवस्य स्मृतिदिवसस्य वा वार्षिककार्यक्रमः कदा सम्पादनीयः ? विषयेऽस्मिन् जनानां मनसि विविधाशङ्का भवितुं शक्नोति। क्षयाधिमासौ चान्द्रमानपद्धत्यामाश्रितौ भवतः। सामान्यावस्थायामस्माकं सौरमासेष्वादौ कृष्णपक्षस्तदनन्तरञ्च शुक्लपक्षो भवति। किन्त्वधिमासस्य समये आदौ शुक्लपक्षस्ततश्च कृष्णपक्षः समायाति। तदैकस्यैव पक्षस्य नाम्न्यादौ 'अधिकः' 'शुद्धः' चेति द्विवारं लिख्यते। दृष्टान्तरूपेण २०८३-वैक्रमाब्दस्य ज्येष्ठमासे मलमासः आपतितोऽस्ति। नेपालपञ्चाङ्गनिर्णायकविकाससमित्या प्रकाशिते पञ्चाङ्गे ज्येष्ठमासस्य २-दिनाङ्के शनिवासरे शुद्धज्येष्ठकृष्णपक्षस्य अमावस्यातिथिः रात्रौ २:७ वादनपर्यन्तमस्ति किन्तु सूर्यस्य वृषराशौ सङ्क्रमणं पूर्वदिनेऽर्थात् ज्येष्ठमासस्य १-दिनाङ्के प्रातः १०:३० प्रवादनकाले सञ्जातम्। सूर्यस्य राशिसङ्क्रमणं 'सङ्क्रान्तिः' इति कथ्यते। अतो 'ज्येष्ठसङ्क्रान्तिः' ज्येष्ठकृष्णचतुर्दशर्यामेव सञ्जातेति दृश्यते। तथैव आषाढमासस्य १-दिनाङ्के सोमवासरेऽधिक-ज्येष्ठकृष्णामावास्यातिथेर्भोगकालः प्रातः ९:१२ प्रवादनकालपर्यन्तमस्ति। किन्तु वृषराशितो मिथुनराशौ सूर्यस्य राशिसङ्क्रमणं तस्मिन्नेवदिने रात्रौ ८:३५ प्रवादनकाले सञ्जातम्। अर्थादत्र ज्येष्ठमासस्य प्रथमदिनाङ्के चतुर्दश्यां तिथौ तथा आषाढमासस्य १-दिनाङ्केऽमावास्यातिथेः समापनपश्चादेव सूर्यसङ्क्रमणं भूत्वा, अधिक-ज्येष्ठशुक्लपक्षस्य प्रतिपत्तिथिमारभ्याधिकज्येष्ठकृष्णपक्षस्यामावास्यां यावत् सूर्यसङ्क्रान्ति-रहितश्चान्द्रमासकालः सञ्जातः। येन कारणेन अत्र अधिकमासो मलमासो वा जातः। अत एव पञ्चाङ्गे वैशाखमासस्य १९-दिनाङ्कस्य शनिवासरादारभ्य ज्येष्ठमासस्य २-दिनाङ्कस्य शनिवासरे रात्रौ रात्रौ २:७ वादनपर्यन्तं शुद्धज्येष्ठकृष्णपक्षः, ज्येष्ठमासस्य २-दिनाङ्कस्य शनिवासरे रात्रौ रात्रौ २:८ प्रवादनात् ज्येष्ठमासस्य १७-दिनाङ्कस्य रविवासरपर्यन्तमधिकज्येष्ठशुक्लपक्षः, ज्येष्ठमासस्य १८-दिनाङ्कस्य सोमवासरादाषाढमासस्य १-दिनाङ्कस्य सोमवासरपर्यन्तमधिकज्येष्ठकृष्णपक्षः, आषाढमासस्य २-दिनाङ्कस्य भौमवासरादस्यैव मासस्य१५-दिनाङ्कं यावत् शुद्धज्येष्ठशुक्लपक्षश्चोल्लिखिताः सन्ति (स्वामी, २०८३: २४–२७)।

## अधिमासस्य तिथि निर्धारणम्

अत्रैकस्यैव मासस्य नाम्न्यादौ 'शुद्धकृष्णपक्षः', तदनन्तरम् 'अधिकशुक्लपक्षः', ततः 'अधिककृष्णपक्षः', अन्ते च 'शुद्धशुक्लपक्षः' इति क्रमेण चत्वारः पक्षाः समायान्ति। अत्र शुद्धकृष्णपक्ष-शुद्धशुक्लपक्षाभ्याम् अधिकशुक्लपक्ष-अधिककृष्णपक्षौ सम्पुटितौ स्तः। अस्मादेव कारणादधिमासकाले जातानां जन्मदिवसः, मृतानां स्मृतिदिवस आगामिवर्षे तस्यैव मासस्य समाने पक्षे क्रियते चेदधिकमासे कृष्णपक्षः पश्चादस्त्यागामिवर्षे पूर्वमागमिष्यति तथाधिकमासे शुक्लपक्षः पूर्वमस्त्यागामिवर्षे पक्षोऽयं पश्चादागमिष्यतीति स्पष्टं दृश्यते। अर्थादधिमासस्य तिथयः आगामिवर्षेषु यथावत् मन्यन्ते, तर्ह्यधिमासे पूर्वं जातानां मृतानां वा तिथयः पश्चादागमिष्यन्ति, अधिमासे पश्चात् जातानां मृतानां वा तिथयः पूर्वं समागमिष्यन्ति। अत एव धर्मशास्त्रेणाधिमासस्य शुक्लपक्षस्य तिथयः आगामिवर्षे शुद्धमासस्य शुक्लपक्षे, कृष्णपक्षस्य तिथयोऽधिमाससंज्ञकमासात् परवर्तिमासस्य कृष्णपक्षे सम्पादनीयाः सन्ति।

अर्थादधिकज्येष्ठशुक्लपक्षस्य तिथय आगामिवर्षतो ज्येष्ठशुक्लपक्षे तथाधिकज्येष्ठकृष्णपक्षस्य तिथय आगामिवर्षत आषाढकृष्णपक्षे सम्पादनीया भवन्ति।

## २०३९-वैक्रमाब्दस्य क्षयमासस्योदाहरणम्

क्षयमासश्चान्द्रमानपद्धतेः परिणामो वर्तते। क्षयमासो न्यूनतमेऽपि एकोनविंशति(१९)-वर्षादेकचत्वारिंशदधिकैकशत(१४१)-वर्षान्तराले सम्भवति। अधिमासे चान्द्रमानानुसारं पक्षद्वयं संयोज्य एकोऽतिरिक्तश्चान्द्रमासो भवति किन्तु क्षयमासे पक्षद्वयस्य लोपं भूत्वा एकश्चान्द्रमासोऽदृश्यो भवति। अधिकमासे एकस्यैव चान्द्रमासस्य पक्षद्वयं वर्धते, परन्तु क्षयमासे मासद्वयात् पक्षद्वयमपसृत्यार्थात् पूर्ववर्तिमासस्योत्तरार्धपक्षस्य, तथोत्तरवर्तिमासस्य पूर्वार्धपक्षस्य क्षयं भवति। प्रथममासस्यामावासीमारभ्य द्वितीयमासस्यामावासीं यावदेकस्मिन् चान्द्रमासे सूर्यस्य राशिसङ्क्रमणं वारद्वयं यावत् भवति चेत् क्षयमासो जायते। समीपवर्तिकालस्य क्षयमासस्योदाहरणार्थं २०३९-वैक्रमाब्दस्य क्षयमासं ग्रहीतुं शक्यते। २०३९-वैक्रमाब्दस्य नेपालदेशीयपञ्चाङ्गे 'पौषकृष्णपक्षात् माघशुक्लपक्षस्य उल्लेखोऽस्ति। पौषकृष्ण-माघशुक्लपक्षयोर्मध्यस्थौ पौषशुक्लपक्ष-माघकृष्णपक्षौ विलुप्तौ दृश्येते। एकस्मिन् चान्द्रमासे द्वौ पक्षौ भवतः। पौषकृष्णपक्ष-माघशुक्लपक्षयोरेकश्चान्द्रमासस्तुल्यः समयो भवति। अतः पौषशुक्लपक्ष-माघकृष्णपक्षौ मिलित्वैकश्चान्द्रमासो भवत्येव। अत्र पक्षद्वयमेवादर्शनं जातमत एकश्चान्द्रमासो विलुप्तो दृश्यते।

'२०३९-वैक्रमाब्दस्य नेपालदेशीयपञ्चाङ्गे पौषमासस्य १६-दिनाङ्कात् भृगुवासरतः पौषमासस्य ३०-दिनाङ्कात् भृगुवासरं यावत् 'पौषकृष्णपक्षः' तदनन्तरं च माघमासस्य १-दिनाङ्कात् शनैश्चरात् १४-दिनाङ्ककात् भृगुवासरं यावत् 'माघशुक्लपक्षः' इति नाम्ना निर्दिष्टोऽस्ति। वस्तुतः पौषकृष्णपक्षादनन्तरं पौषशुक्लपक्षः, ततो माघकृष्णपक्षस्तदनन्तरं माघशुक्लपक्षस्य क्रमो भवति किन्त्वत्र पक्षद्वयमपसृत्य तथाविधं न जातम्। पौषमासस्य ३०-दिनाङ्के भृगुवासरे पौषकृष्णपक्षस्य अमावासीतिथिः प्रातः ९:२९ प्रवादनकाले समाप्ता जाता। तदनन्तरं शुक्लपक्षस्य प्रतिपत्तिथिः आरब्धा, तस्यामेव प्रतिपत्तिथौ सायं ६:२४ प्रवादने सूर्यो धनुराशितो मकरराशिं प्रविष्टः। ततो माघमासस्य २९-दिनाङ्कात् शनिवासरे रात्रौ ४:३७ प्रवादनकाले सूर्यः कुम्भराशिं प्रविष्टस्ततोऽपरा सङ्क्रान्तिः प्राप्ता। तस्मिन् दिने अमावास्यातिथेर्भोगकालः रात्रौ ३:९ प्रवादनकालं यावदस्ति। अत्र पौषकृष्णामवासीतो माघकृष्णामवासीं यावत् मध्यवर्तिसमये सूर्यस्य राशिसक्रमणं वारद्वयं सञ्जातम्। इत्थमत्रामावासिद्वययोर्मध्यस्थितश्चान्द्रमासे सूर्यस्य राशिसङ्क्रमणं वारद्वयं यावत् सौरसङ्क्रान्तिद्वयं सञ्जातमतः क्षयमासः सञ्जातो दृश्यते।

## क्षयमासस्याब्देऽधिमासप्रमाणम्

चान्द्रमानस्यैकमासात्मके काले यदि द्वे सौरसङ्क्रान्ती आपततः, तर्हि क्षयमासः सम्भवीति सिद्धान्तज्योतिषस्य मान्यतानुसारेण उपर्युल्लिखितोदाहरणे क्षयमासः प्रवृत्तो दृश्यते। क्षयमासे एकस्यैव चान्द्रमासस्य द्वौ पक्षौ न विलुप्तौ भवतः निरन्तरमागतस्य प्रथमचान्द्रमासस्योत्तरपक्षस्य द्वितीयचान्द्रमासस्य पूर्वपक्षस्य क्षयं भवति। यस्मिन् वर्षे क्षयमासः

भवति, तस्मिन् वर्षे क्षयमासात् पूर्वं पश्चाच्च मिलित्वा द्वावधिमासौ भवतः। अस्य प्रत्यक्षं प्रमाणं विक्रमसंवत् २०३९ तमस्य वर्षस्य नेपालदेशीयपञ्चाङ्गे द्रष्टुं शक्यते। तत्र प्रथममाश्विनमासे तदनु फाल्गुनमासे च मिलित्वा वारद्वयं यावदधिमासौ सञ्जातौ दृश्येते (शर्मा, २०३९: ३०–३२)।

क्षयमासयुक्ते वर्षे समागतयोर्द्वयोरधिमासयोर्मध्ये क्षयमासात् पूर्वं 'संसर्पाधिमासः' तथा पश्चाच्च 'अंहस्पतिः' संज्ञकाधिमासो जायत इति मुहूर्तचिन्तामणेः 'पीयूषधारा' टीकायाम्  टीकाकारेण गोविन्देनोल्लिखितमस्ति। तथैव धर्मसिन्धु-वीरमित्रोदय-कालमाधवादिग्रन्थेषु विषयेऽस्मिन् प्रभूता परिचर्चा कृता विद्यते। अस्यैव प्रमाणस्याधारेण २०३९-वैक्रमाब्दस्य पञ्चाङ्गे आश्विनमासे जातोऽधिमासः 'संसर्पाधिमासः' तथा फाल्गुनमासे प्रवृत्तोऽधिमास 'अंहस्पत्यधिमासः' नाम्ना नामाङ्कितो दृश्यते। क्षयमासयुते वर्षे प्रथमचान्द्रमासस्य शुक्लपक्षः द्वितीयचान्द्रमासस्य कृष्णपक्षः मिलित्वा द्वौ पक्षौ एव विलुप्तौ भवतः किन्तु तस्मिन्नेव वर्षे द्वयोः अधिमासयोः कारणादन्ये चत्वारः पक्षाः वर्धन्ते; येन कारणेन समग्रवर्षे शुक्ल-कृष्णात्मकाः षड्विंशतिः (२६) सङ्ख्यकाः पक्षाः भवन्ति।

## क्षयमासवर्षे शुक्लकृष्णभेदेन पक्षाः

क्षयमासयुते २०३९-वैक्रमाब्दस्य नैपालदेशीयपञ्चाङ्गे वैशाखमासस्य प्रथमदिवसादारभ्य चैत्रमासान्तं यावत् चान्द्रमासानां पक्षाः यथोल्लिखिताः प्राप्यन्ते – वैशाखकृष्णपक्षः, वैशाखशुक्लपक्षः, ज्येष्ठकृष्णपक्षः, ज्येष्ठशुक्लपक्षः, आषाढकृष्णपक्षः,आषाढशुक्लपक्षः,श्रावणकृष्णपक्षः,श्रावणशुक्लपक्षः,भाद्रकृष्णपक्षः,भाद्रशुक्लपक्षः, शुद्धाश्विनकृष्ण(पितृ)पक्षः (भाद्रपदमासस्य १९-तमदिवसाद् गुरुवासरादाश्विनमासस्य १-दिनाङ्कं यावत् ), संसर्पाख्याधिकआश्विनशुक्लपक्षः (सौराश्विनमासस्य २-दिनाङ्कात् शुक्रवासरादाश्विनमासस्य १७-तमदिनाङ्कं यावत्), संसर्पाख्याधिकआश्विनकृष्णपक्षः (आश्विनमासस्य १८-दिनाङ्कात् सोमवासराद् आश्विनमासस्य ३०-दिनाङ्कं यावत्), शुद्धआश्विनशुक्ल(दुर्गा)पक्षः (आश्विनमासस्य ३१-दिनाङ्कात् रविवासरतः कार्तिकमासस्य १५-दिनाङ्कं यावत्), कार्तिककृष्णपक्षः, कार्तिकशुक्लपक्षः, मार्गशीर्षकृष्णपक्षः, मार्गशीर्षशुक्लपक्षः, पौषकृष्णपक्षः (पौषमासस्य १६-दिनाङ्कात् गुरुवासरतः पौषमासस्य ३०-दिनाङ्कं यावत्), माघशुक्लपक्षः (माघमासस्य १-दिनाङ्कात् शुक्रवासरतः माघमासस्य १४-दिनाङ्कं यावत्), शुद्धफाल्गुनकृष्णपक्षः (माघमासस्य १५- दिनाङ्कात् शनिवासरतः माघमासस्य २९-दिनाङ्कं यावत्), अधिकफाल्गुनशुक्लपक्षः (फाल्गुनमासस्य १-दिनाङ्कात् रविवासरतः फाल्गुनमासस्य १५-दिनाङ्कं यावत्), अधिकफाल्गुनकृष्णपक्षः (फाल्गुनमासस्य १६-दिनाङ्कात् सोमवासरतः फाल्गुनमासस्य ३०-दिनाङ्कं यावत्), शुद्धफाल्गुनशुक्लपक्षः (चैत्रमासस्य १-दिनाङ्कात् मङ्गलवासरतः चैत्रमासस्य १४-दिनाङ्कं यावत्), चैत्रकृष्णपक्षः (चैत्रमासस्य १५-दिनाङ्कात् बुधवासरतः चैत्रमासस्य ३०-दिनाङ्कं यावत्); तथा च चैत्रशुक्लपक्षे  २०४०-वैक्रमाब्दस्य वैशाखमासस्य १-दिनाङ्कश्च समावेशिताः सन्ति। अत्र वैशाखकृष्णपक्षादारभ्य चैत्रशुक्लपक्षं यावत् एकवर्षीयसमयावधौ पौषशुक्ल-माघकृष्णपक्षौ लौपौ जातौ। पक्षद्वयस्य लोपेनैकस्य चान्द्रमासस्य लोपो जातः। अत्र यश्चान्द्रमासो लुप्तः स एव 'क्षयमासः' वर्तते। तथैव क्षयमासात् पूर्वं स्थितस्याधिकाश्विनशुक्लपक्षादारभ्याधिकाश्विनकृष्णपक्षस्य समापनं यावत् यः कालः सः 'संसर्पाधिमासः' अस्ति चेत्

क्षयमासादनन्तरमधिकफाल्गुनशुक्लपक्षादारभ्याधिकफाल्गुनकृष्णपक्षस्य समापनं यावत् यः कालः स ‘अंहस्पति-अधिमासः’ इति कथ्यते।

## क्षयमासस्य तिथिनिर्णयः

जनानां जननं मरणं वा यस्मिन् कस्मिन्नपि समये भवितुं शक्नोति। मलमासे जातानां मृतानां वा वार्षिकतिथिनिर्धारणे यथा निश्चितो नियमोऽस्ति तथैव क्षयमासे जातानां मृतानां वा जनानां कृतेऽपि तिथिनिर्धारणे नियमो विद्यते। क्षयमासे तिथिनिर्धारणार्थं प्रथमं तिथिमानं द्विभागं क्रियते। आगामिवर्षस्य कृते पूर्वार्धभागस्य तिथयःपूर्ववर्तिमासस्य शुक्लपक्षस्य समानतिथिषु, उत्तरार्धभागस्य तिथय उत्तरवर्तिमासस्य कृष्णपक्षस्य समानतिथिषु निर्धारणं क्रियते। उदाहरणार्थं २०३९-वैक्रमाब्दे पौषमासस्य १६-दिनाङ्कात् ३०-दिनाङ्कपर्यन्तं पौषकृष्णपक्षः, ततो माघमासस्य १-दिनाङ्कात् १४-दिनाङ्कपर्यन्तं माघशुक्लपक्षोऽस्ति। तत्र पौषशुक्लमाघकृष्णपक्षौ लुप्तौ स्तः। अतः पौषकृष्णपक्षस्य पूर्वार्धस्यागामितिथयः पौषकृष्णपक्षस्य समानतिथिषु, पौषकृष्णपक्षस्योत्तरार्धस्यागामितिथयः माघकृष्णपक्षस्य समानतिथिषु निर्धार्यन्ते। तथैव माघशुक्लपक्षस्य पूर्वार्धस्यागामितिथयः पौषशुक्लपक्षस्य समानतिथिषु, माघशुक्लपक्षस्योत्तरार्धस्यागामितिथयः माघशुक्लपक्षस्य समानतिथिषु निर्धार्यन्ते। मुहूर्तचिन्तामणौ सङ्क्रान्तिप्रकरणे पीयूषधाराटीकायामस्य प्रमाणं प्राप्यते यथा– ‘तिथ्यर्धे प्रथमे पूर्वोऽपरस्मिन्नपरस्तथा। मासाविति बुधैश्चिन्त्यौ क्षयमासस्य मध्यगौ।’

**क्षयमास-विवरण-तालिका**

| क्र.सं. | वैक्रमाब्दे | मासः | वैक्रमाब्दे | मासः | वैक्रमाब्दे | मासः |
|---|---|---|---|---|---|---|
| १ | २०२० | मार्गशीर्षः | २१८० | पौषः | २६४९ | मार्गशीर्षः |
| २ | २०३९ | पौषः | २२२६ | मार्गशीर्षः | २६६८ | पौषः |
| ३ | २०८५ | मार्गशीर्षः | २२४५ | पौषः | २७९० | मार्गशीर्षः |
| ४ | २१०४ | मार्गशीर्षः | २२८३ | मार्गशीर्षः | २८०९ | पौषः |
| ५ | २१२३ | मार्गशीर्षः | २३०२ | मार्गशीर्षः | २९३१ | मार्गशीर्षः |
| ६ | २१४२ | कार्तिकः | २३६७ | मार्गशीर्षः | २९५० | पौषः |
| ७ | २१६१ | मार्गशीर्षः | २५०८ | मार्गशीर्षः | २९९६ | मार्गशीर्षः |

(तिवारी, २०४३, २४८)

## निष्कर्षः

अधिमासक्षयमासौ द्वावपि चान्द्रमासाधारितमासौ स्तः। चान्द्रमासस्य विकाररूपेणोत्पन्नौ क्षयमासाधिमासौ द्वावेवाशुद्धौ मन्येते। अधिमासः प्रतित्रिवर्षान्तरालेषु समागच्छति किन्तु क्षयमासस्यागमने वर्षाधिकानि लगन्ति। अधिमासस्याधिकमास-मलमास-पुरुषोत्तममासाद्यन्यानि नामान्यपि प्रसिद्धानि सन्ति। क्षयमासः कार्तिकादिषु त्रिषु मासेषु भवति चेद् अधिमासः फाल्गुनादिष्वष्टमासेषु भवति। माघमासे क्षयमासाधिकमासौ द्वावेवासम्भवौ। अधिकमासस्य वर्षे क्षयमासस्य संभावना न भवति किन्तु क्षयमासस्य वर्षे संसर्प-अंहस्पतिनामानौ द्वाधिमासावधिकौ

भवतः। अधिकमासे एकस्यैव मासस्य शुक्ल-कृष्णौ द्वौ पक्षौ वर्धितौ भवतः। क्षयमासे प्रथममासस्य शुक्लपक्षस्य द्वितीयमासस्य कृष्णपक्षस्य लोपो भवति। पाश्चात्यज्योतिषे 'लीप इयर'वर्षे फरबरीमासस्य दिनसङ्ख्यास्वैकदिनं वर्धितं भवति।

## कृतज्ञताज्ञापनम्

विषयप्रतिपादनदृष्ट्या प्राविधिकदृष्ट्या च लेखस्यास्य परीक्षणं विधाय सम्पादनाय परिष्काराय च हार्दमुपकारं कृतवद्भ्यो विशेषज्ञेभ्यः, सर्वेभ्यो गुरुभ्यः, अन्येभ्यः सहयोगिभ्यश्च हार्दं कार्तज्ञं व्यनज्मि।

## सन्दर्भग्रन्थसूची

कृष्णकुमारः, (सन् २००५), *भावफलविचारः*, दिल्लीः एल्फा प्रकाशनम्।

ढुङ्गेलः, सूर्यप्रसादः (वै.२०८३), *सूर्यपञ्चाङ्गम्*, काठमाडौः सूर्यपञ्चाङ्गकार्यालयः।

तिवारी, मणिप्रसादः (वै.२०४३) *त्रिकालजन्मकुण्डलीदर्पण*, काठमाडौः मणिप्रसाद तिवारीप्रकाशनम्।

दशोरा, नन्दलालः, (सन् १९९४), *ब्रह्माण्ड और ज्योतिष रहस्यः*, हरिद्वारः रणधीर प्रकाशनम्।

दीक्षितःशङ्करबालकृष्णः(सन् २००२), भारतीयज्योतिष, (शिवानाथ झारखण्डी, अनु.), लखनउः उत्तरप्रदेश हिन्दी संस्थानम्।

भट्टः, कमलाकरः (वै.२०५२) *सिद्धान्ततत्त्वविवेकः*, (सुधाकरद्विवेदी, सम्पा.), वाराणसीः सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः।

भट्टराई, कपिलदेवः, (वै.२०६४), *के हो अधिमास ?* "गोरखापत्र" वैशाख २२, शनिवार, पृ.६, काठमाडौः गोरखापत्र संस्थानम्।

भट्टराई, कपिलदेवः, (वै.२०६४), *मलमास- के हुन्छ के हुँदैन ?* "गोरखापत्र" जेठ १, मङ्गलबार, पृ.६, काठमाडौः गोरखापत्र संस्थानम्।

भास्कराचार्यः, (सन् १९८८), *सिद्धान्तशिरोमणेः गोलाध्याय*, (केदारदत्त जोशी,व्या.), दिल्लीः मोतीलाल बनारसीदासः।

रामदीनदैवज्ञः (सन् २०१५), *बृहद्दैवज्ञरञ्जननम्* (तृतीय सं.) (डा. मुरलीधर चतुर्वेदी, व्या.) वाराणसीः मोतीलाल वनारसीदासः।

वराहमिहिरः, (सन् २००९), *बृहज्जातकम्*, (डा.अमितकुमार शुक्लः, सम्पा.), वाराणसीः रूपेश ठाकुरप्रसाद प्रकाशनम्।

वराहमिहिरः, (वै.२०५८), *बृहत्संहिता*, (आचार्य नागेन्द्र पाण्डेय, सम्पा.), वाराणसीः सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः।

वराहमिहिरः, (सन् २०१५), *लघुजातकम्*, (डा.कृष्णकुमारपाण्डेयः, सम्पा.), वाराणसीः शिव संस्कृत संस्थानम्।

वैद्यनाथदैवज्ञः, (वै.२०५३), *जातकपारिजातः*, (पं.श्रीमातृप्रसादशास्त्री, सम्पा.), वाराणसीः चौखम्भा संस्कृत संस्थानम्।

सापकोटा, विश्वरामशर्मा (वै.२०३९), *पं.बाबुराम शर्माको पञ्चाङ्ग*, काठमाडौः विश्वरामशर्मा प्रकाशनम्।

*सूर्यसिद्धान्तः*, (वै.२०५२), (कपिलेश्वरशास्त्री, सम्पा.) वाराणसीः चौखम्बा संस्कृतसंस्थानम्।